मयं रूपम् अहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्ष्यमाण उपतिष्ठेत्। नमो ज्योतिर्लोकाय कालायनाय अनिमिषां पतये महापुरुषाभिधीमहीति"।

**ज्योतिर्हस्ता** स्त्री "हस्तं शरीरमित्याहुर्हस्तञ्च गगनं तथा। ज्योतिश्च यहनक्षत्रं ज्योतिर्हस्ता ततः स्मृता" देवीपु०४५ अ० उक्तनिरुक्तियुक्तायां दुर्गायाम्।

**ज्योतिश्चक्र** न० ज्योतिभिर्नक्षत्रैर्घटितं चक्रम्। १भचक्रे "सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगम्। तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः" ति० त० उक्ते अश्विन्यादिभिर्नक्षत्रैर्घटिते मण्डलाकारे राशिचक्रे। स्तिमितवायुगमित्यनेन तस्य नाधःपतनमात्रं विवक्षितं न गत्यभावः प्रवहवायुना तस्य प्रतिदिनं प्रत्यग्गतेः सूर्य्यसिद्धान्तादावुक्तत्वात् खगोलशब्दे २४१६ पृष्ठादौ दृश्यम्।

**ज्योतिः(ष्)शास्त्र** न० ज्योतिषां सूर्य्यादीनां गत्यादिज्ञापकं शास्त्रम् वा शत्वम्। सूर्य्यादिग्रहगत्यादिबोधके कालज्ञाने वेदाङ्गे शास्त्रभेदे। "वेदास्तावद्यज्ञकर्मप्रवृत्ता-यज्ञाः प्रोक्तास्ते तु कालाश्रयेण। शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्। शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ। या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः। वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते। संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः। तस्माद्द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम्। यो ज्योतिषं वेत्ति नरः स सम्यग् धर्मार्थकामान् लभते यशश्च"। "ज्योतिःशास्त्रमनेकभेदविषयम्" वृ०स० १अ०। अस्य भेदादि अङ्कशब्दे ७२ पृ० दृश्यम्।

**ज्योतिष** न० ज्योतिः सूर्य्यादिगत्यादिकं प्रतिपाद्यतयाऽस्त्यस्य अच्। १ज्योतिःशास्त्रे "ज्योतिषं नयनं विदुः" शिक्षा। ज्योतिःशास्त्रशब्दे उदा०। "ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम्" वृ०स० ७अ०। २तारायां स्त्री गौरा० ङीष्। ज्योतिषं ज्ञेयत्वेनास्त्यस्य इनि। ज्योतिषिन्। ज्योतिःशास्त्राभिज्ञे त्रि० स्त्रियां ङीप्।

**ज्योतिषिक** त्रि० ज्योतिरधीते उक्थादि० ठक् संज्ञापूर्वकविधेरनित्वात् न वृद्धिः। ज्योतिःशास्त्राध्येतरि।

**ज्योतिष्क** पु० ज्योतिरिव कायति कै—क। १चित्रकवृक्षे "एतान्येवावाप्य क्षारकल्पेन निस्रुते पालाशे क्षारे ततो विपाच्य फाणितमिव सञ्जातमवतार्य्य लेपयेत्। ज्योतिष्क फललाक्षामरिचपिप्पलीसुमनःपत्रैर्वा" सुश्रु०। २मेथिकावीजे च राजनि०। ३गणकारिकावृक्षे रत्नमा०। ४ग्रहतारानक्षत्रादौ ब०व० "तदीशभागे तस्याद्रेः शृङ्गमादित्यसन्निभम्। यत्तत् ज्योतिष्कमित्याहुः सदा पशुपतेः प्रियम्" इत्युक्ते ५मेरोः शृङ्गभेदे न०।

**ज्योतिष्टोम** पु० ज्योतींषि त्रिवृदादयः स्तोमा यस्य षत्वम्। १स्वनामख्याते अग्निष्टोमस्वंस्थारूपे यज्ञभेदे तद्विधानादि ताण्ड्य० ब्रा० ४।१।६।

"यज्ज्योतिष्टोमो भवति यज्ञमुखन्तदाप्नुवन्ति यदुकथो यज्ञक्रतोरनन्तरयाय यद्रात्रिः सर्वस्याप्त्यै" मू०

"अथ षोड़शिकोऽयमतिरात्र इत्युक्तं, क्रमो ज्योतिष्टोमोऽतिरात्रः स षोड़शिक इति। अथ तद्व्यतिरिक्ताभिस्तिसृभिः संस्थाभिरवयुज्य स्तूयते। यद्यपि सर्वेषामपि ज्योतिष्टोमत्वमस्ति तथापि उकथातिरात्रसंस्थयोः पृथग्वक्ष्यमाणत्वात् अग्निष्टोमसंस्थैव ज्योतिष्टोमशब्देनोच्यते। ज्योतींषि त्रिवृदादयः स्तोमा यस्य स ज्योतिष्टोमः। तथा च तैत्तिरीयकं त्रिवृत्पञ्चदश सप्तदश एकविंश एतानि ज्योतींषि यत एतस्य स्तोमा इति। यज्ज्योतिष्टोमोऽग्निष्टोमो द्वादशस्तोत्रात्मको भवति ज्योतिष्टोमस्य हि अग्निष्टोमसंस्था मुख्या, "एष वाव प्रथमो यज्ञानामिति" श्रुतेः। तत्तेन यज्ञमुखं यज्ञानां मुखभूतमग्निष्टोमं प्राप्य आप्नुवन्ति सत्रिणः समृद्धा भवन्ति तथा तस्मिन्नतिरात्रे उकथः पञ्चदशस्तुतशस्त्रसाध्यः क्रतुरन्तर्भवतीति यत् तत् यज्ञक्रतोः संपूर्णस्य यज्ञस्य अनन्तरयाय अपरित्यागाय भवति उकथसंस्थायां हि क्रतुः संपूर्णो भवति यथा पूर्वयोः सवनयोः पञ्चदश पञ्चदश स्तोत्राणि तथा तृतीयेऽपि स्तोत्रपञ्चकसद्भावात्। अग्निष्टोमस्त्वसंपूर्णः क्रतुः उक्तहेतोरभावात्" भा०।

तस्य च अग्निष्टोमसंस्थत्वेन ज्योतिष्टोमनामताहेतुरुक्तो यथा "यदेतानि सर्वाणि सह दुरुपापानि केतेषामुपाप्तिरिति ज्योतिष्टोम एवाग्निष्टोमेनैवाग्निष्टोमेन यजेत। तस्य वा एतस्य ज्योतिष्टोमस्याग्निष्टोमस्य त्रिवृद्बहिष्पवमानं तद्व्रतस्य शिरः, पञ्चदशसप्तदशा उत्तरौ पवमानौ तौ पक्षौ, पञ्चदशं होतृराज्यं सप्तदशं पृष्ठमेकविंशं यज्ञायज्ञियं तत् पुच्छम्" शत० ब्रा० १०।१।२।७। "अधुना प्रथमसंस्थारूपज्योतिष्टोमाग्निष्टोमं महाव्रतयज्ञात्मना स्तोतुं तत्रैवाग्निचयनादित्रयस्योपादानाद् ब्रह्मवादिप्रश्नोत्तराभ्यां दर्शयति।